## ११.४४ संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्त्युत्थकविप्रौढोक्तिसिद्धस्य वाक्यप्रकाशता

'चूताङ्कुरावतंसम्' इत्यादिपद्ये अर्थशक्त्युत्थकविप्रौढोक्तिसिद्धस्य पदप्रकाशतायाः उदाहरणं दत्त्वा इदानीं तस्यैव वाक्यप्रकाशतायाः उदाहरणं प्रददाति। वसन्तऋतोः वर्णनप्रसङ्गे कविः कथयति यत् कामदेवस्य सखा वसन्तः युवतिजनान् लक्ष्यीकर्तुं फलं मञ्जरीं वा अग्रे करोति तथा नूतनानि पत्राणि पुङ्खरूपेण बाणस्य पृष्ठभागे योजयति। एवं प्रकारेण बाणनिमार्णं तु करोति, किन्तु साम्प्रतं युवतिजनेषु प्रहारार्थं कामाय न अर्पयति।

अत्र वसन्तऋतुः बाणनिर्माता। कामदेवश्च प्रयोक्ता। एवम् आम्रमञ्जर्यः बाणस्थानिनः, युवतयश्च लक्ष्यम्। इत्येतत् सर्वं लोके असम्भवत् अपि काव्येषु वर्णितमिति कविप्रौढोक्तिमात्रसिद्धम्। अतोऽत्र कविना प्रौढोक्त्या वर्णितं वस्तु अर्थशक्त्या मदनोन्मथावस्थायाः प्रारम्भः उत्तरोत्तरं च तस्य विजृम्भणमिति वस्तु व्यङ्ग्यम् एवं कविप्रौढोक्तिसिद्धवस्तुना वस्तुव्यङ्ग्य-स्योदाहरणम्। तथा च समस्ताद्वाक्याद् अर्थशक्त्या वस्तु व्यज्यते इति वाक्यप्रकाशता ज्ञेया।

अत्रापि आचार्येण कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्योदाहरणं न प्रदत्तम्। उक्तोदाहरणे एव तद् गतार्थीकृतम्। पूर्वोदाहरणेऽपि कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य उदाहरणं नास्ति। किन्तु लोचनकारः ''सत्यं मनोरमा रामाः इत्यादिना पद्येन कविनिबद्धवक्तृ प्रौढोक्तिसिद्धस्य उदाहरणं प्रदत्तवान्। तथैव इदानीमपि कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य वाक्यप्रकाशतायाः उदाहरणं भवतः प्रबोधाय लोचनटीकायाः उद्धृत्य प्रदीयते। तथा हि- शिखरिणी क्व नु नाम कियच्चिरमित्यादि।

अत्र कश्चित् कविनिबद्धो वक्ता (नायकः) तरुण्याः अधरस्य सौन्दर्यातिशयम-वलोक्य कथयति- हे तरुणि! शुकशिशुरयं किं तपः कृतवान्? कुत्र तपः कृतवान्? कियत्तपः कृतवान्? यस्य फलरूपेण तवाधर इव पाटलं बिम्बफलं दशतीति। अत्र अर्थशक्त्या वस्तुना कस्यापि नायकस्य नायिकायाः अधरदशनेच्छायाः प्रकाशनं भवति इति अर्थशक्त्युत्थं कविनिबद्ध-वक्तृप्रोढोक्तिसिद्धं वस्तु सम्पूर्णाद् वाक्यादर्थशक्त्या प्रकाशते-

Scanned with CamScanner

अत्र सज्जयति सुरभिमासो न तावदर्पयति अनङ्गाय शरानित्ययं वाक्यार्थः कविप्रौढोक्तिमात्रनिष्पन्नशरीरे मन्मथोन्माथकदनावस्थां वसन्तसमयस्य सूचयति।''

व्याख्या- अत्रैव प्रभेदे-विवक्षितान्यपरवाच्यस्य अर्थशक्त्युत्थसंलक्ष्यक्रमव्यङ्ग्ये कविप्रौढोक्ति-सिद्धस्य वाक्यप्रकाशतायाम्। यथोदाहृतम्-पूर्वोदाहृतं यत् सज्जयति सुरभिमासो न तावदिति अस्मिन् पद्ये- ''सुरभिमासः-वसन्तऋतुः शरान्-बाणान्, सज्जयति-मुखं पुङ्खञ्च क्रमेण मञ्जरीत्यादिभिः पल्लवादिभिश्च निर्माति। तावत्-किन्तु, अनङ्गाय-कामाय, न अर्पयति-न समर्पयति इति वाक्यार्थः परिलसति। अस्य वाक्यार्थस्य मर्यादया अर्थशक्त्या कविप्रौढोक्तिमात्रनिष्पन्नशरीरः मन्मथस्य-कामस्य, उन्माथः-उद्वेगः, तादृशी कदनावस्था-उद्वेगावस्था च सूच्यते।

**बोधप्रश्नः**

२६. अत्र वाक्यप्रकाशता कथम्?

२७. अत्र व्यङ्ग्यं किम्?

२८. अर्थशक्त्युत्थः इत्यस्य कोऽर्थः?

## ११.४.५ संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्त्युत्थस्वतःसम्भवीत्यस्य पदप्रकाशता

अस्मिन् प्रकरणे प्रथमं भवान् जानातु यत् किं नाम स्वतः सम्भवीति? यद् वस्तु लोके यथा दृश्यते तत् तथैव काव्ये वर्ण्यते तदा स्वतः सम्भवीति कथ्यते। पूर्वम् आचार्येण अर्थशक्त्युत्थध्वनेः कविप्रौढोक्तिसिद्धस्य भेदस्य पदप्रकाशता, वाक्यप्रकशता च वर्णिता। इदानीं स्वतःसम्भविनः अर्थशक्त्युत्थस्य पदप्रकाशतायाः उदाहरणं दातुमुपक्रम्यते। तत् सर्वप्रथमं तस्य सारांशः ज्ञेयः भवता। तदनन्तरं मूलपाठस्य भवान् ज्ञानं करिष्यति।

कश्चिद् वणिक् व्याघ्रचर्म गजदन्तं च क्रेतुं कस्यापि व्याधस्य गृहं गतवान्। व्याधः वृद्धः आसीत् स तु व्याघ्रादीन् हन्तुं वनं न गच्छति स्म। तस्य युवा पुत्रः एव व्याघ्रान् गजादीन् हत्वा व्याघ्रचर्म हस्तिदन्तान् आनयति स्म। वृद्धः गृहे स्थितः एव वणिग्भ्यः विक्रयं करोति स्म। किन्तु आसन्ने एव व्याधपुत्रस्य विवाहः सम्पन्नः जातः, येन स नवोढां पत्नीम्प्रति आकृष्टः सन् वनं न याति स्म। अथवा सम्भोगाधिक्येन दुर्बलः सन् व्याघ्रादीनां हनने असमर्थः जातः। एतस्मात् कारणात् तस्य गृहे व्याघ्रचर्मणाम् गजदन्तादीनाञ्च अभावो जातः। अतएव द्वारि समागतं क्रेतारं वणिजं प्रति **वृद्धो व्याधः ब्रूते-** हे वणिक्! यावत् लुलितालकमुखी पुत्रबधूः मम गृहे भ्रमन्ती सती स्थास्यति। तावत् मम गृहे हस्तिदन्ताः व्याघ्रचर्माणि च कुतः लप्स्यन्ते। अस्मिन् पद्ये 'लुलितालकमुखी' इत्येतत् पदं स्वतः सम्भविना अर्थशक्त्या व्याधबध्वाः सुरतातिशयं सुरतक्रीडाधिक्यं वा संसूचयद् व्याधपुत्रस्य सुरतसम्भोगजनितां दुर्बलतां प्रकाशयति। अतः अत्र स्वतःसम्भावी-अर्थशक्त्युत्थः संलक्ष्यकम व्यङ्ग्यः। तथा चात्र केवलं लुलितालकमुखीति पदेन व्यञ्जना, इत्यस्मात् कारणात् पदप्रकाशता बोद्धव्या भवता। तथाहि-

**मूलपाठः**

**स्वतः सम्भविशरीरार्थशक्त्युद्भव-प्रभेदे पदप्रकाशता यथा-**

**वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च।**
**यावत् लुलितालकमुखी गृहे परिष्वक्कते स्नुषा।।**

अत्र 'लुलितालकमुखी' इत्येतत् पदं व्याधवध्वाः स्वतः सम्भावितशरीरार्थशक्त्या सुरतक्रीडासक्तिं सूचयत्तदीयस्य भर्तुः सततसम्भोगक्षामतां प्रकाशयति।।''

Scanned with CamScanner

**व्याख्या**– स्वतः सम्भविनः–अर्थशक्त्युत्थस्य पदप्रकाशतायाः उदाहरणं प्रस्तौति 'वाणिजक हरितदन्तेत्यादिना। हे वाणिजक–हे वणिक्! अस्माकं समीपे, व्याघ्रकृत्तयः–व्याघ्रचर्माणि, हरितदन्ताः–गजदन्ताः, कुतः–तावत् कस्मात् प्राप्तुं शक्यते। यावत्, गृहे–मम गृहे, लुलितालकमुखी–लुलितैः चञ्चलैः कुञ्चितैः वा अलकैः सहितं मुखं यस्याः सा लुलितालकमुखी, स्नुषा–पुत्रवधूः, परिष्वक्तते विद्यते, प्राङ्गणे परिभ्रमन्ती वा अस्ति। अत्र लुलितेति स्वरूपमात्रेण विशेषणमवलिप्ततया हरितदन्ताद्यपाहरणं सम्भाव्यमिति वाक्यार्थस्य तावत्येव न काचिदनुपपत्तिः।

अत्र 'लुलितालकमुखी' इदं पदं स्वतः सम्भविना अर्थेन अर्थशक्त्या व्याधस्य पुत्रवध्वाः सुरतक्रीडाशक्तिं संसूचयत् तत्पत्युः नैरन्तर्येण कृतेन सम्भोगेन शरीरदौर्बल्यं प्रकाशयति इति भावः।

**बोधप्रश्नः**

२९. अत्र कथम् अर्थशक्त्युत्थ- स्वतः सम्भवी भेदः घटते?

३०. लुलितालकमुखी इत्यत्र कथं समासः कश्चार्थः?

३१. कथमत्र पदप्रकाशता विव्रीयताम्?

## ११.४.६ संलक्ष्यक्रमव्यङ्ग्ये अर्थशक्त्युत्थस्वतःसम्भवीत्यस्य वाक्यप्रकाशता

संलक्ष्यक्रमव्यङ्ग्यस्य अर्थशक्त्युत्थस्य स्वतः सम्भवीति द्वितीयः भेदः अस्ति, तस्य भेदस्य वाक्यप्रकाशतायाः उदाहरणम् इदानीं प्रस्तूयते।

प्रस्तोष्यमाणस्य उदाहरणस्य अयं भावः – एकः व्याधः आसीत्। तस्य अनेकाः पत्न्यः आसन्, तेन व्याधेन एका अपरापि नवा परिणीता। इदं स्वाभाविकं यत् पूर्व-परिणीताभ्यः स्त्रिभ्यः अधिकं प्रेम नवोढायां भवतीति। व्याधस्य याः पूर्वपत्न्यः आसन् ताः बहुमूल्यानि कर्णाभरणानि परिधृतवत्यः आसन्। इयं नवोढा कर्णालङ्काररूपेण केवलं मयूरपुच्छमेव परिधृतवती आसीत्। तथापि स्वीयानां सपत्नीनां समक्षं सगर्वा सती भ्रमति स्म।

अयं वाच्यार्थः अस्ति। अभिधया अस्य वाक्यस्य अर्थबोधानन्तरं पुनः अर्थशक्त्या व्यञ्जनया विशेषः अर्थः ध्वन्यते यो हि अर्थः लोकेऽपि जनैः अनुभूयते। अतः अयं स्वतः सम्भवीति कथ्यते। यद्यपि सम्पूर्णेभ्यः एव वाक्येभ्यः अयं लोकसिद्धः अर्थः आयाति अतः अस्य वाक्यप्रकाशता।

---

**मूलपाठः**

**तस्यैव वाक्यप्रकशता यथा-**

**शिखिपिच्छकर्णपूरा भार्या व्याधस्य गर्विणी भ्रमति।**
**मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम्।।**

**अनेनापि वाक्येन व्याधवध्वाः शिखिपिच्छकर्णपूरायाः, नवपरिणीतायाः कस्याश्चित् सौभाग्यातिशयः प्रकाश्यते। तत् सम्भोगैकरतो मयूरमारणसमर्थः पतिर्जातः इत्यर्थप्रकाशनात् तदन्यासां चिरपरिणीतानां मुक्ताफलरचितप्रसाधनानां दौर्भाग्यातिशयः ख्याप्यते। तत् सम्भोगकाले एव व्याधः करिवरवधव्यापारसमर्थः आसीदित्यर्थप्रकाशनात्।**

---

**व्याख्या**:– तस्यैव=संलक्ष्यक्रमव्यङ्ग्यस्य अर्थशक्त्युत्थस्वतःसम्भविवस्तुना वस्तुव्यङ्ग्यस्य वाक्यप्रकाशतायाम्। मुक्ताफलरचितप्रसाधनानाम्=मुक्ताफलैः रचितानि प्रसाधनानि याभिः तासाम्। सपत्नीनाम्=समानः पतिः यासां तासाम्। मध्ये, व्याधस्य=किरातस्य, शिखिपिच्छकर्णपूरा=शिखिनः

Scanned with CamScanner

मयूरस्य, पिच्छम् पुच्छमेव कर्णपूरः कर्णालङ्कारः यस्याः सा भार्या नवोढा पत्नी, गर्विणी अहङ्कारवती सती भ्रमति=सपत्नीनां सम्मुखं चलति।

अनेन उपर्युक्तेन वाक्येन शिखिपिच्छकर्णपूरायाः नवपरिणीतायाः व्याधवध्वाः सौभाग्यातिशयः प्रकाश्यते। यतो हि इदानीं सम्भोगैकरतो मयूरमारणमात्रसमर्थः पतिः जातः। भवतीनां चिरपरिणीतानां दौर्भाग्यातिशयः आसीत्। यतोहि भवतीभिः सम्भोगं कुर्वन्नपि असौ करिवरमारणसमर्थः आसीत् इति। एतेन युष्माभिः साकम् अतिशयेन प्रेम्णा सम्भोगं न करोति स्म इति ध्वन्यते।

**बोधप्रश्नः**

३२. अत्र नवपरिणीतायाः किं सूच्यते?

३३. अत्र पद्ये छन्दः किम्?

३४. कथमत्र स्वतः सम्भवित्वम्, युक्त्या प्रतिपाद्यताम्?

Scanned with CamScanner